# શિવમહિમ્નઃસ્તોત્રમ્

મહિમ્નઃ પારં તે પરમવિદુષો યદ્યસદૃશી
સ્તુતિર્બ્રહ્માદીનામપિ તદવસન્નાસ્ત્વયિ ગિરઃ ।
અથાવાચ્યઃ સર્વઃ સ્વમતિપરિણામાવધિ ગૃણન્
મમાપ્યેષ સ્તોત્રે હર નિરપવાદઃ પરિકરઃ ॥ ૧ ॥

અતીતઃ પન્થાનં તવ ચ મહિમા વાઙ્મનસયો -
રતદ્વ્યાવૃત્ત્યા યં ચકિતમભિધત્તે શ્રુતિરપિ ।
સ કસ્ય સ્તોતવ્યઃ કતિવિધગુણઃ કસ્ય વિષયઃ
પદે ત્વર્વાચીને પતતિ ન મનઃ કસ્ય ન વચઃ ॥ ૨ ॥

મધુસ્ફીતા વાચઃ પરમમમૃતં નિર્મિતવતસ્તવ
બ્રહ્મન્ કિં વાગપિ સુરગુરોર્વિસ્મયપદમ્ ।
મમ ત્વેતાં વાણીં ગુણકથનપુણ્યેન ભવતઃ
પુનામીત્યર્થેઽસ્મિન્ પુરમથન બુદ્ધિર્વ્યવસિતા ॥ ૩ ॥

તવૈશ્વર્યં યત્તજ્જગદુદયરક્ષાપ્રલયકૃત્
ત્રયીવસ્તુવ્યસ્તં તિસૃષુ ગુણભિન્નાસુ તનુષુ ।
અભવ્યાનામસ્મિન્ વરદ રમણીયામરમણીં
વિહન્તું વ્યાક્રોશીં વિદધત ઈહૈકે જડધિયઃ ॥ ૪ ॥

કિમીહઃ કિં કાયઃ સ ખલુ કિમુપાયસ્ત્રિભુવનં
કિમાધારો ધાતા સૃજતિ કિમુપાદાન ઈતિ ચ ।
અતર્ક્યૈશ્વર્યે ત્વય્યનવસરદુઃસ્થો હતધિયઃ
કુતર્કોઽયં કાંશ્ચિન્મુખરયતિ મોહાય જગતઃ ॥ ૫ ॥

અજન્માનો લોકાઃ કિમવયવવન્તોઽપિ જગતામધિષ્ઠ
ાતારં કિં ભવવિધિરનાદૃત્ય ભવતિ ।
અનીશો વા કુર્યાદ્ ભુવનજનને કઃ પરિકરો
યતો મન્દાસ્ત્વાં પ્રત્યમરવર સંશેરત ઈમે ॥ ૬ ॥

ત્રયી સાંખ્યં યોગઃ પશુપતિમતં વૈષ્ણવમિતિ
પ્રભિન્ને પ્રસ્થાને પરમિદમદઃ પથ્યમિતિ ચ ।
રુચીનાં વૈચિત્ર્યાદૃજુકુટિલનાનાપથજુષાં
નૃણામેકો ગમ્યસ્ત્વમસિ પયસામર્ણવ ઈવ ।। ૭ ।।
મહોક્ષઃ ખટ્વાંગં પરશુરજિનં ભસ્મ ફણિનઃ
કપાલં ચેતીયત્તવ વરદ તન્ત્રોપકરણમ્ ।
સુરાસ્તાં તામૃદ્ધિં દધતિ ચ ભવદ્ભ્રૂપ્રણિહિતાં
ન હિ સ્વાત્મારામં વિષયમૃગતૃષ્ણા ભ્રમયતિ ।। ૮ ।।
ધ્રુવં કશ્ચિત્ સર્વં સકલમપરસ્ત્વધ્રુવમિદં
પરો ધ્રૌવ્યાધ્રૌવ્યે જગતિ ગદતિ વ્યસ્તવિષયે ।
સમસ્તેઽપ્યેતસ્મિન્ પુરમથન તૈર્વિસ્મિત ઈવ
સ્તુવન્જિહેમિ ત્વાં ન ખલુ નનુ ધૃષ્ટા મુખરતા ।। ૯ ।।
તવૈશ્વર્યં યત્નાદ્ યદુપરિ વિરંચો હરિરધઃ
પરિચ્છેત્તું યાતાવનલમનલસ્કન્ધવપુષઃ ।
તતો ભક્તિશ્રદ્ધાભરગુરુગૃણદ્ભ્યાં ગિરિશ યત્
સ્વયં તસ્થે તાભ્યાં તવ કિમનુવૃત્તિર્ન ફલતિ ।। ૧૦ ।।
અયત્નાદાપાદ્ય ત્રિભુવનમવૈરવ્યતિકરં
દશાસ્યો યદ્ બાહૂનભૃત રણકણ્ડૂપરવશાન્ ।
શિરઃપદ્મશ્રેણીરચિતચરણામ્ભોરુહબલેઃ
સ્થિરાયાસ્ત્વદ્ભક્તેસ્ત્રિપુરહર વિસ્ફૂર્જિતમિદમ્ ।। ૧૧ ।।
અમુષ્ય ત્વત્સેવાસમધિગતસારં ભુજવનં
બલાત્ કૈલાસેઽપિ ત્વદધિવસતૌ વિક્રમયતઃ ।
અલભ્યા પાતાલેઽપ્યલસચલિતાંગુષ્ઠશિરસિ
પ્રતિષ્ઠા ત્વય્યાસીદ્ ધ્રુવમુપચિતો મુહ્યતિ ખલઃ ।। ૧૨ ।।
યદૃદ્ધિં સુત્રામ્ણો વરદ પરમોચ્ચૈરપિ સતીમધ
શ્ચક્રે બાણઃ પરિજનવિધેયસ્ત્રિભુવનઃ ।

ન તચ્ચિત્રં તસ્મિન્ વરિવસિતરિ ત્વચ્ચરણયો-
ર્ન કસ્યાપ્યુન્નત્યૈ ભવતિ શિરસસ્ત્વય્યવનતિઃ ॥ ૧૩ ॥
અકાણ્ડબ્રહ્માણ્ડક્ષયચકિતદેવાસુરકૃપાવિધે
યસ્યાસીદ્યસ્ત્રિનયનવિષં સંહૃતવતઃ ।
સ કલ્માષઃ કણ્ઠે તવ ન કુરુતે ન શ્રિયમહો
વિકારોઽપિ શ્લાઘ્યો ભુવનભયભંગવ્યસનિનઃ ॥ ૧૪ ॥
અસિદ્ધાર્થા નૈવ ક્વચિદપિ સદેવાસુરનરે
નિવર્તન્તે નિત્યં જગતિ જયિનો યસ્ય વિશિખાઃ ।
સ પશ્યન્નીશ ત્વામિતરસુરસાધારણમભૂત્
સ્મરઃ સ્મર્તવ્યાત્મા ન હિ વશિષુ પથ્યઃ પરિભવઃ॥ ૧૫ ॥
મહી પાદાઘાતાદ્ વ્રજતિ સહસા સંશયપદં
પદં વિષ્ણોર્ભ્રામ્યદ્ભુજપરિઘરુગ્ણગ્રહગણમ્ ।
મુહુર્દ્યૌર્દૌઃસ્થ્યં યાત્યનિભૃતજટાતાડિતતટા
જગદ્રક્ષાયૈ ત્વં નટસિ નનુ વામૈવ વિભુતા ॥ ૧૬ ॥
વિયદ્વ્યાપી તારાગણગુણિતફેનોદ્ગમરુચિઃ
પ્રવાહો વારાં યઃ પૃષતલઘુદૃષ્ટઃ શિરસિ તે ।
જગદ્ દ્વીપાકારં જલધિવલયં તેન કૃતમિત્યનેનૈ
વોન્નેયં ધૃતમહિમ દિવ્યં તવ વપુઃ ॥ ૧૭ ॥
રથઃ ક્ષોણી યન્તા શતધૃતિરગેન્દ્રો ધનુરથો
રથાંગે ચન્દ્રાર્કૌ રથચરણપાણિઃ શર ઈતિ ।
દિધક્ષોસ્તે કોઽયં ત્રિપુરતૃણમાડમ્બરવિધિ-
ર્વિધેયૈઃ ક્રીડન્ત્યો ન ખલુ પરતન્ત્રાઃ પ્રભુધિયઃ ॥ ૧૮ ॥
હરિસ્તે સાહસ્ત્રં કમલબલિમાધાય પદયો-
ર્યદેકોને તસ્મિન્ નિજમુદહરન્નેત્રકમલમ્ ।
ગતો ભક્ત્યુદ્રેકઃ પરિણતિમસૌ ચક્રવપુષા
ત્રયાણાં રક્ષાયૈ ત્રિપુરહર જાગર્તિ જગતામ્ ॥ ૧૯ ॥

ક્રતૌ સુપ્તે જાગ્રત્ત્વમસિ ફલયોગે ક્રતુમતાં
ક્વ કર્મ પ્રધ્વસ્તં ફલતિ પુરુષારાધનમૃતે ।
અતસ્ત્વાં સમ્પ્રેક્ષ્ય ક્રતુષુ ફલદાનપ્રતિભુવં
શ્રુતો શ્રદ્ધાં બદ્ધ્વા દઢપરિકરઃ કર્મસુ જનઃ ।। ૨૦ ।।
ક્રિયાદક્ષો દક્ષઃ ક્રતુપતિરધીશસ્તનુભૃતામ
ૃષીણામાર્ત્વિજ્યં શરણદ સદસ્યાઃ સુરગણાઃ ।
ક્રતુભ્રેષસ્ત્વત્તઃ ક્રતુફલવિધાનવ્યસનિનો
ધ્રુવં કર્તુઃ શ્રદ્ધાવિધુરમભિચારાય હિ મખાઃ ।। ૨૧ ।।
પ્રજાનાથં નાથ પ્રસભમભિકં સ્વાં દુહિતરં
ગતં રોહિદ્ભૂતાં રિરમયિષુમૃષ્યસ્ય વપુષા ।
ધનુષ્પાણેર્યાતં દિવમપિ સપત્રાકૃતમમું
ત્રસન્તં તેડદ્યાપિ ત્યજતિ ન મૃગવ્યાધરભસઃ ।। ૨૨ ।।
સ્વલાવણ્યાશંસાધૃતધનુષમઘણીય તૃણવત્
પુરઃ પ્લુષ્ટં દષ્ટ્વા પુરમથન પુષ્પાયુધમપિ ।
યદિ સ્ત્રૈણં દેવી યમનિરતદેહાર્ધઘટનાદ
વૈતિ ત્વામદ્ધા બત વરદ મુગ્ધા યુવતયઃ ।। ૨૩ ।।
શ્મશાનેષ્વાક્રીડા સ્મરહર પિશાચાઃ સહચરાશ્ચિતાભસ્માલેપઃ
સ્રગપિ નૃકરોટીપરિકરઃ ।
અમંગલ્યં શીલં તવ ભવતુ નામૈવમખિલં
તથાપિ સ્મર્તૄણાં વરદ પરમં મંગલમસિ ।। ૨૪ ।।
મનઃ પ્રત્યક્ચિત્તે સવિધમવધાયાત્તમરુતઃ
પ્રહૃષ્યદ્રોમાણઃ પ્રમદસલિલોત્સંગિતદશઃ ।
યદાલોક્યાહ્લાદં હ્રદ ઈવ નિમજ્યામૃતમયે
દધત્યન્તસ્તત્ત્વં કિમપિ યમિનસ્તત્ કિલ ભવાન્ ।। ૨૫ ।।
ત્વમર્કસ્ત્વં સોમસ્ત્વમસિ પવનસ્ત્વં હુતવહસ્ત્વમાપ
સ્ત્વં વ્યોમ ત્વમુ ધરણિરાત્મા ત્વમિતિ ચ ।

પરિચ્છિન્નામેવં ત્વયિ પરિણતા બિભ્રતુ ગિરં
ન વિદ્મસ્તત્તત્ત્વં વયમિહ તુ યત્ત્વં ન ભવસિ ।। ૨૬ ।।
ત્રયીં તિસ્રો વૃત્તીસ્ત્રિભુવનમથો ત્રીનપિ સુરા-
નકારાદ્યૈર્વર્ણૈસ્ત્રિભિરભિદધત્ તીર્ણવિકૃતિ ।
તુરીયં તે ધામ ધ્વનિભિરવરુન્ધાનમણુભિઃ
સમસ્તં વ્યસ્તં ત્વં શરણદ ગૃણાત્યોમિતિ પદમ્ ।। ૨૭ ।।
ભવઃ શર્વો રુદ્રઃ પશુપતિરથોગ્રઃ સહમહાં
સ્તથા ભીમેશાનાવિતિ યદભિધાનાષ્ટકમિદમ્ ।
અમુષ્મિન્ પ્રત્યેકં પ્રવિચરતિ દેવ શ્રુતિરપિ
પ્રિયાયાસ્મૈ ધામ્ને પ્રવિહિતનમસ્યોઽસ્મિ ભવતે ।। ૨૮ ।।
નમો નેદિષ્ઠાય પ્રિયદવ દવિષ્ઠાય ચ નમો
નમઃ ક્ષોદિષ્ઠાય સ્મરહર મહિષ્ઠાય ચ નમઃ ।
નમો વર્ષિષ્ઠાય ત્રિનયન યવિષ્ઠાય ચ નમો
નમઃ સર્વસ્મૈ તે તદિદમિતિ શર્વાય ચ નમઃ ।। ૨૯ ।।
બહુલરજસે વિશ્વોત્પત્તૌ ભવાય નમો નમઃ
પ્રબલતમસે તત્સંહારે હરાય નમો નમઃ ।
જનસુખકૃતે સત્ત્વોદ્રિક્તૌ મૃડાય નમો નમઃ
પ્રમહસિ પદે નિસ્ત્રૈગુણ્યે શિવાય નમો નમઃ ।। ૩૦ ।।
કૃશપરિણતિ ચેતઃ ક્લેશવશ્યં ક્વ ચેદં
ક્વ ચ તવ ગુણસીમોલ્લંઘિની શશ્વદૃદ્ધિઃ ।
ઈતિ ચકિતમમન્દીકૃત્ય માં ભક્તિરાધાદ્
વરદ ચરણયોસ્તે વાક્યપુષ્પોપહારમ્ ।। ૩૧ ।।
અસિતગિરિસમં સ્યાત્ કજ્જલં સિન્ધુપાત્રે
સુરતરુવરશાખા લેખની પત્રમુર્વી ।
લિખતિ યદિ ગૃહીત્વા શારદા સર્વકાલં
તદપિ તવ ગુણાનામીશ પારં ન યાતિ ।। ૩૨ ।।

અસુરસુરમુનિન્દ્રૈરર્ચિતસ્યેન્દુમૌલે-

ર્ગ્રથિતગુણમહિમ્નો નિર્ગુણસ્યેશ્વરસ્ય ।

સકલગણવરિષ્ઠઃ પુષ્પદન્તાભિધાનો

રુચિરમલઘુવૃત્તૈઃ સ્તોત્રમેતચ્ચકાર ॥ ૩૩ ॥

અહરહરનવદ્યં ધૂર્જટેઃ સ્તોત્રમેતત્

પઠતિ પરમભક્તયા શુદ્ધચિત્તઃ પુમાન્ યઃ ।

સ ભવતિ શિવલોકે રુદ્રતુલ્યસ્તથાત્ર

પ્રચુરતરધનાયુઃ પુત્રવાન્ કીર્તિમાંશ્ચ ॥ ૩૪ ॥

મહેશાન્નાપરો દેવો મહિમ્નો નાપરા સ્તુતિઃ ।

અઘોરાન્નાપરો મન્ત્રો નાસ્તિ તત્ત્વં ગુરોઃ પરમ્ ॥ ૩૫ ॥

દીક્ષા દાનં તપસ્તીર્થં જ્ઞાનં યાગાદિકાઃ ક્રિયાઃ ।

મહિમ્નઃ સ્તવપાઠસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૩૬ ॥

કુસુમદશનનામા સર્વગન્ધર્વરાજઃ

શિશુશશિધરમૌલેર્દેવદેવસ્ય દાસઃ

સ ખલુ નિજમહિમ્નો ભ્રષ્ટ એવાસ્ય રોષાત્

સ્વતનમિદકાર્ષીદ્ દિવ્યદિવ્યં મહિમ્નઃ ॥ ૩૭ ॥

સુરવરમુનિપૂજ્યં સ્વર્ગમોક્ષૈકહેતું

પઠતિ યદિ મનુષ્યઃ પ્રાંજલિર્નાન્યચેતાઃ ।

વ્રજતિ શિવસમીપં કિન્નરૈઃ સ્તૂયમાનઃ

સ્તવનમિદમોઘં પુષ્પદન્તપ્રણીતમ્ ॥ ૩૮ ॥

આસમાપ્તમિદં સ્તોત્રં પુણ્યં ગંધર્વભાષિતમ્ ।

અનૌપમ્યં મનોહારિ શિવમીશ્વરવર્ણનમ્ ॥ ૩૯ ॥

ઈત્યેષા વાઙ્મયી પૂજા શ્રીમચ્છંકરપાદયોઃ ।

અર્પિતા તેન દેવેશઃ પ્રીયતાં મે સદાશિવઃ ॥ ૪૦ ॥

તવ તત્ત્વં ન જાનામિ કીદશોઽસિ મહેશ્વર ।

યાદશોઽસિ મહાદેવ તાદશાય નમો નમઃ ॥ ૪૧ ॥

એકકાલં દ્વિકાલં વા ત્રિકાલં યઃ પઠેન્નરઃ

સર્વપાપ વિનિર્મુક્તઃ શિવલોકે મહીયતે ॥ ૪૨ ॥

શ્રી પુષ્પદન્તમુખપંકજનિર્ગતેન

સ્તોત્રેણ કિલ્બિષહરેણ હરપ્રિયેણ ।

કંઠસ્થિતેન પઠિતેન સમાહિતેન

સુપ્રીણિતો ભવતિ ભૂતપતિર્મહેશઃ ॥ ૪૩ ॥